**निघात** पु० नि+हन—भावे घञ् । १आहनने अन्यस्वरेण २अन्यस्वरहनने उदात्तादिहननपूर्वके अनुदात्तकरणे च कर्मणि घञ् । अनुदात्ते ३स्वरे "समानवाक्ये निघातयुष्मदस्मदादेशाः" वार्त्ति० । "उदात्तादिहननपूर्वकमनुदात्तकरणं निघातः" मनोरमा । "ज्यानिघातकठिनाङ्गुलित्वचौ" रघुः । [घातिन्याम् उणादिकोषः ।

**निघाति** पु० निहन्यतेऽनया निहन्—इञ् कुत्वञ्च । लौह-

**निघृष्व** त्रि० नि+घृष-क्वन् निपा० । १खुरे २तन्मार्जने च उज्ज्वल० कर्मणि क्वन् । ३ह्रस्वे निघण्टुः ।

**निघ्न** त्रि०निहन्यते नि+हन—घञर्थे क । १अधीने अमरः । नियम्यत्वात् तस्य तथात्वम् "निघ्नस्य मे भर्त्तृनिदेशरौक्ष्यम्" रघुः । २आहते ३पूरिते च "स्याप्योऽन्त्यवर्गो द्विगुणान्त्यनिघ्नः" लीला० "पुनर्द्वादशनिघ्नाच्च लभते यत्फलं बुधैः" सूर्यसि० । सूर्यवंश्ये ४अनरण्यसुते नृपभेदे पु० । "अनरण्यसुतो निघ्नो निघ्नपुत्रौ बभूवतुः" हरिवं०१७अ०। अनमित्रपुत्रे ५नृपभेदे च "अनमित्रसुतो निघ्नो निघ्नस्य तु बभूवतुः" हरिवं० ३९अ० । [दृश्यम् ।

**निचन्द्र** पु० दानवभेदे "निचन्द्रश्च निकुम्भश्च" निकुम्भशब्दे

**निचय** पु० नि+चि—भावे अच् । १समूहे २अवयवादीनां समुच्चये ३निश्चये च शब्दर० । "प्रणामाशनिचयो वा स्यात् समानिचय एव वा" मनुः कर्मणि अच् । ४निचीयमाने अवयवादिना वर्द्धमाने "सर्वे क्षयान्ता निचयाः पतनान्ताः समुच्छ्रयाः" भा०स्त्री० २अ०। अन्यथा० कृतादिना च्व्यर्थे त०अ०। निचयकृत निचयीकृते त्रि० ।

**निचयक** त्रि० निश्चये कुशलः आकर्षा० कन् । निचये कुशले

**निचाय** पु० नि+चि—परिमाणाख्यायां घञ् । राशीकृते धान्यादौ "एकस्तण्डुलनिचायः अत्र राश्येकत्वेन समुदायिनां परिच्छित्तिर्गम्यते" सि०कौ० ।

**निचि** पु० नि+चि— बा० डि । गोकर्णशिरोदेशे रभसः ।

**निचिकी** स्त्री निचिना कायति शोभते कै—क गौरा० ङीष् । उत्तमायां गवि नैचिक्याम् शब्दार्थचि० ।

**निचित** त्रि० नि+चि—क्त । १व्याप्ते २पूरिते ३सङ्कीर्णे ४निर्मिते च हेमच० । ५नदीभेदे स्त्री "कौशिकीं निश्चितां कृत्यां निचितां लोहतारिणीम्" भा०भी० ९अ० ।

**निचिर** न० नितरां चिरः प्रा०स० । १अत्यन्तचिरकाले २तद्वर्त्तिनि त्रि० "प्रस्त ज्येष्ठां निचिराभ्याम्" ऋ०६।१२६।१

**निचुम्पुण** पु० निचमनेन पूर्यते नीचैरस्मिन् क्वणन्ति दधतीति वा पृषो० । १समुद्रे २अवभृथे च "समुद्रोऽपि निचुम्पुण उच्यते निचमनेन पूर्यते । अवभृथोऽपि निचुम्पुण उच्यते नीचैरस्मिन् क्वणन्ति नीचैर्दधतीति वा । नीचं कृणोतीति वा" निरु०५।१८। "अवभृथो निचुम्पुणो भवति" तदुक्ता श्रुतिः "अवभृथ ! निचुम्पुण निचेरुरसि निचुम्पुणः" यजु० ३।४८ "निचुम्पुण चुप मन्दायां गतौ नितरां चोपति मन्दं गच्छति निचुम्पुणः । उणप्रत्ययो नुमागमश्च । यद्वा नीचैरस्मिन् क्वणन्ति नीचशब्देन कर्म कुर्वन्त्यवभृथो निचुम्पुणः । "नौणस्पूणप्रणभ्रुणे"त्यादिना नीचैः शब्दोपपदात् क्वणतेः कप्रत्ययान्तो निपातः धातोः पुम्भाव उपपदस्य निचुम्भावश्च निपातितः । तथा हे अवभृथ ! यद्यपि त्वं निचेरुरसि नितरां चरतीति निचेरुः । नितरां गमनशीलोऽसि तथाप्यत्र निचुम्पुणो भव मन्दगमनो भव" वेददी० ।

**निचुल** पु० नि+चुल—क । १हिज्जलवृक्षे अमरः । २वेतसवृक्षे राजनि० । "स्थानादस्मात् सरसनिचुलादुत्पतोदङ्मुखः खम्" मेघ० ।

**निचुलक** न० नि+चुल—बा०कुन् । १योधादेर्वारबाणतिसन्नाहे निचोलके हारा०। २कुञ्चिकामत्स्ये पुंस्त्री शब्दार्थचि०।

**निचेय** त्रि० नि+चि—यत् । आचीयमाने स्त्रियां टाप् । आङि तु स्त्रियां शार्ङ्गरवा० ङीन् । आनिचेयी

**निचेरु** पु० नि+चर—उन् बा० आदेरेच्च । नितरां चरणशीले "अवभृथ निचुम्पुण निचेरुरसि निचुम्पुणः" यजु०३।४८

**निचोल** पु०नि+चुल—अच् । १प्रच्छदपटे येन शय्यादि प्रच्छाद्यते तस्मिन् अमरः २दोलिकाद्यावरणवस्त्रे ३स्त्रीपिधानपटे च हेमच० । "शीलय नीलनिचोलम्" गीतगो०

**निचोलक** पु० निचोल इव कायति कै—क । योधादेर्वारबाणतिसन्नाहे कूर्पासे हेमच० । [त्रिका० ।

**निच्छवि** पु० निकृष्टा छविरत्र । (त्रिहोत्) तीरभुक्तदेशे

**निच्छिवि** पु० व्रात्यात् क्षत्रियात्सवर्णायामुत्पन्ने जातिभेदे "झल्लोमल्लश्च राजन्याद् व्रात्यात् निच्छिविरेव च" मनुः

**निज** त्रि० नितरां जायते नि+जन—ड । १स्वकीये २नित्ये च अमरः । "सेनागजेन मथितस्य निजप्रसूनैः" माघः । ३स्वाभाविके "स्वाम्यं यस्य निजम्" न्याय लीला०।

**निजघास** पु० पार्वत्या रोषसंभूते गणभेदे "निजघासो घसश्चैव स्थूणाकर्णः प्रशोषणः" हरिवं० १६८अ० ।

**निजघ्नि** त्रि० नि+हन—कि द्वित्वम् । नितरां हननशीले "यथा निजघ्निरोदसी" ऋ०८।५।१।२ ।

**निजधृति** स्त्री शाकद्वीपस्थे १नदीभेदे तदुपक्रमे "एतेषां